दैनिकम् ई-संस्कृतवार्तापत्रम्
# हिमसंस्कृतवार्ता

पञ्चाङ्गम्
वि.सं. २०८३,
कलियुगाब्धः ५१२७ वर्षा-ऋतुः
सूर्यः दक्षिणायनम् आषाढकृष्णचतुर्थी
आषाढः 19 प्रविष्टांशः मङ्गलमयः भवेत्

■ पृष्ठ-5 ■ वर्ष-5 ■ अङ्क-251
1 जुलाई 03, 2026
Website- www.himsanskritam.com Email-himsanskrit@gmail.com

2 देशस्य ग्रामाणां विकासस्य गतिं वर्धयितुं प्रमुखं पदक्षेपः अस्तीति-केन्द्रीय -ग्रामीण विकास कृषि कृषक कल्याण मन्त्री शिवराज-सिङ्घ-चौहानः

3 किन्नौरे मेघविस्फोटः, पादसेतुः प्रवाहितः; लाहौले पाषाणघातेन एचआरटीसी-परिचालकस्य मृत्युः

5 संस्कृतकथा संयमस्य विजयः (संयम की जीत)

## भारत-जापानदेशाभ्यां आर्थिकसुरक्षा-ऊर्जासुरक्षा-औषध-कृत्रिम बुद्धिमत्तादिषु क्षेत्रेषु अनेके सन्धयः हस्ताक्षरिताः



**हिमसंस्कृतवार्ता।** भारतेन जापानेन च आर्थिक-ऊर्जा-सुरक्षा, औषध-रक्षा-कृत्रिम बुद्धिमत्तादिषु विभिन्न-क्षेत्रेषु अनेके प्रमुख सन्धयः परस्परं विनिमयीकृताः। प्रधानमन्त्री नरेन्द्रमोदी नवदेहल्यां स्वस्य जापानी समकक्षया प्रधानमन्त्रिणा साने ताकाइची इत्यनया सह वार्षिक-शिखर-स्तरीयाम् वार्ताम् साधितवान् । द्विपक्षीय वार्तानन्तरं संयुक्तं संवाददातृ-सम्मेलनं सम्बोधयन् प्रधानमन्त्री मोदी प्रावोचत् यत्, वर्तमान-समये पारस्परिक विश्वासः सम्पत्तिः वर्तते , सहैव भारत-जापान-सम्बन्धेन समयस्य प्रत्येका परीक्षा उत्तीर्णा। तेन रेखाङ्कितं यत्, उभावपि देशौ विश्वस्य विशाल-अर्थव्यवस्थासु अन्यतमौ स्तः । प्रधानमन्त्रिणा सबलं प्रोक्तं यत्, उभावपि देशौ आर्थिक-सुरक्षायाः ऊर्जा-सुरक्षायाः च महत्त्वं सम्यक् जानीतः । तेन प्रोक्तं यत्, प्राविधिक सहभागिता भारत-जापान-सहयोगस्य महत्त्वपूर्णः आधार स्तम्भः भविष्यति। एतमेव सङ्कल्पं सफलीकर्तुं द्वाभ्याम् अपि देशाभ्यां कृत्रिम बुद्धिमत्तायाः क्षेत्रे एकं संयुक्त-वक्तव्यम् प्रकाशितम्। प्रधानमन्त्रिणा विशेषेण घोषितं यत्, भारत-जापानयोः मध्ये प्रथम-सह-विकास-परियोजनायै सन्धि-पत्रे हस्ताक्षरं सञ्जातम् । अवधेयं वर्तते यत् जापान-देशस्य प्रधानमन्त्री साने ताकाइची इत्येषा त्रिदिवसीय-यात्रायाः कृते नवदेहलीं सम्प्राप्ता। प्रधानमन्त्रिरूपेण ताकाइची-महोदयायाः इयम् प्रथमा आधिकारिकी भारत-यात्रा वर्तते ।

**भारत-जापानयोः पारस्परिक सम्बन्धेन समयस्य प्रत्येका परीक्षा समुत्तीर्णा - प्रधानमन्त्री**

प्रधानमन्त्री नरेन्द्रमोदी अवदत् यत् भारत-जापानयोः पारस्परिक सम्बन्धाः सर्वथा विशिष्टाः सन्ति, तथा च द्वयोः देशयोः आर्थिक सहभागिता वैश्विक पटले साक्षात् साफल्यस्य आदर्शरूपम् अस्ति। नवदेहल्यां भारत-जापान-संयुक्त-आर्थिक-मञ्चं सम्बोधयन् श्रीमोदी प्रोक्तवान् यत्, यदा जापान-देशस्य प्रविधि-विशेषज्ञता, निवेशश्च भारतस्य तीव्रगत्या सह मिलति तदा समग्रं विश्वं लाभान्वितं भवति। उभाभ्यां पक्षाभ्यां स्वकीयः आर्थिक-सम्बन्धः गतिशीलं गम्भीरं च विधातुं सङ्कल्पः कृतः । अत्रावसरे द्वाभ्यामपि देशाभ्यां आर्थिक-सुरक्षा-कृत्रिमबुद्धिमत्ता-रक्षा-स्वास्थ्यक्षेत्रेषु भविष्योन्मुखाः सन्धयः विहिताः। वैश्विकार्थव्यवस्थायाः विषये कथयता प्रधानमन्त्रिणा रेखाङ्कितं यत्, वर्तमान-समये समग्रं विश्वं आपूर्ति-शृङ्खला-अवरोधैः व्यापारिक-अनिश्चिततावशात् च ग्रस्तं वर्तते, अत्रान्तरे भारतं विश्वस्य तीव्रगत्या वर्धमाना प्रमुखा अर्थव्यवस्था वर्तते । विगत-वित्तीयवर्षे भारतस्य जीडीपी-वृद्धिः सप्त-दशमलव-सप्तप्रतिशतम् आसीत्। तेन विशेषेण प्रोक्तं यत्, सर्वकारेण कर-प्रणाल्यां, सुशासने, व्यापार-सुगमतायां च उत्तम-परिष्काराणि कृतानि । स्वकीय-सम्बोधने जापानस्य प्रधानमन्त्री साने ताकाइची इत्येषा ऊर्जा-सुरक्षां प्रधान-विषयं अवदत् यत्, जापान-देशः पावर एशिया इनिशिएटिव इत्यनेन माध्यमेन मुक्त-पारदर्शि-ऊर्जा-व्यापारं सुदृढं कर्तुं कृतसङ्कल्पः अस्ति। अस्मिन्नेव कार्यक्रमे उभाभ्यां प्रधानमन्त्रिभ्यां हरियाणा-राज्यस्य खरखौदा-स्थिते मारुति सुजुकी संस्थायाः चतुर्थस्य वाहन-निर्माण-संयंत्रस्य संयुक्त रूपेण उद्घाटनं कृतम्।

## संयुक्तराष्ट्र-महासभायाम् अन्ताराष्ट्रिय-आतंकवादं विरुध्य व्यापक-अभिसमयस्य कृते भारतस्य चिरलम्बित-प्रस्तावः समर्थितः



हिमसंस्कृतवार्ता। संयुक्तराष्ट्र-महासभायाम् अन्ताराष्ट्रिय-आतंकवादं विरुध्य व्यापक-अभिसमयस्य कृते भारतस्य कश्चन चिरलम्बित-प्रस्तावः समर्थितः । संयुक्तराष्ट्रस्य वैश्विक आतंकवाद-विरोधी-रणनीतेः नवम-समीक्षायाम् या च चत्वारिंशदधिकैकशतं मतैः अङ्गीकृता, तत्र सदस्य देशाः आदिष्टाः यत् ते विगत-त्रिदशकेभ्यः भारतेन प्रस्तावितस्य अस्य अभिसमयस्य कृते अन्तिम-रूपं प्रदातुं पूर्ण-प्रयत्नान् विदध्युः । संयुक्तराष्ट्र भारतस्य स्थायी प्रतिनिधिः पी. हरीशः महासभां सम्बोधयन् अवदत् यत्, कस्यचित् सर्वसम्मत-विधि-तन्त्रस्य अभावात् वैश्विक आतंकवाद-विरोधी-प्रयासाः दुर्बलाः भवन्ति । तेन विशेषेण रेखाङ्कितं यत्, आतंकवादस्य निवारणे कोऽपि द्विविध-मानदण्डः न भवेत्, तथा च अस्य दुष्कृत्यस्य अपराधिनः, वित्तपोषकाः, प्रायोजकाश्च अस्त पूर्णतया उत्तरदायित्वेन दण्डनीयाः । सः सबलं प्रोक्तवान् यत् आतंकवादी केवलम् आतंकवादी एव भवति, अतः मिथ्या-तुलनाभिः अथवा राजनैतिक कथाभिः आतंकवाद-विरोधी-अभियानानि कदापि शिथिलानि न भवेयुः।

## फीफा-विश्वकप्-क्रीडायां, अमेरिका-देशः द्वयाधिकद्विसहस्रतम वर्षानन्तरं प्रथमवारं नॉकआउट-चरणे विजयं पञ्जीकृतवान्



**हिमसंस्कृतवार्ता।** फीफा-विश्वकप्-क्रीडायां, अमेरिका-देशः द्वयाधिकद्विसहस्रतम वर्षानन्तरं प्रथमवारं नॉकआउट-चरणे विजयं पञ्जीकृतवान्, बोस्निया-हर्जेगोविना-देशौ द्वे-शून्येन पराजितवान्; बेल्जियम्-देशः अपि सेनेगल्-देशस्य उपरि अतिरिक्तसमयस्य विजयेन राउण्ड्-आफ्-16 इत्यस्मिन् प्रविष्टवान्।

## सुभाषितम्

**बालो वा यदि वा वृद्धो,**
**युवा वा गृहमागतः।**
**तस्य पूजा विधातव्या,**
**सर्वस्याभ्यागतो गुरुः॥**

अर्थात्- बालक, बूढ़ा तथा युवा इनमें से घर पर कोई आ जाए तो उसका आदर सत्कार करना चाहिए क्योंकि अभ्यागत (अतिथि) सब का पूजनीय होता है।




सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य समुखे कस्वा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवहारस्य्ङ्केतः-१७७१११
सङ्केता- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्

## जम्मू-नगरस्य भगवती-नगर-आधार-शिविरात् तीर्थयात्रिणाम् प्रथमस्य दलस्य प्रस्थानेन सह श्रीअमरनाथ-यात्रा विधिवत् समारब्धा



वार्षिकस्याः श्री-अमरनाथ-जी-यात्रायाः कृते द्वा-विंशत्यधिक-अष्टशतोत्तर-चतुःसहस्र-तीर्थ-यात्रिणां प्रथमसमूहं जम्मू-नगरस्य भगवतीनगर-यात्रीनिवास-आधारशिबिरात् विस्तृतसुरक्षा-व्यवस्थायां हरितध्वजं प्रदर्श्य उपराज्यपालेन मनोजसिन्हावर्येण प्रेषितम्। देशस्य विभिन्नेभ्यः भागेभ्यः तीर्थयात्रिणः पवित्रयात्रायां भागग्रहणाय जम्मू-नगरम् आगच्छन्तः सन्ति।

# वी.बी जी राम जी अधिनियमः, विंशतिः पञ्चविंशतिः आजिविका-सुनिश्चितातायाः, ग्रामीणाजीविकायाः सुदृढीकरणस्य तथा च देशस्य ग्रामाणां विकासस्य गतिं वर्धयितुं प्रमुखं पदक्षेपः अस्तीति-केन्द्रीय - ग्रामीण विकास कृषि कृषक कल्याण मन्त्री शिवराज-सिङ्घ-चौहानः




केन्द्रीय - ग्रामीण विकास कृषि कृषक कल्याण मन्त्री शिवराज-सिङ्घ-चौहानः अवदत् यत् विकसित भारत-रोजगारेत्यस्य तथा आजीविका मिशन् इत्यस्य प्रत्याभूतिः वी.बी जी राम जी अधिनियमः, विंशतिः पञ्चविंशतिः आजिविका-सुनिश्चिततायाः, ग्रामीणाजीविकायाः सुदृढीकरणस्य तथा च देशस्य ग्रामाणां विकासस्य गतिं वर्धयितुं प्रमुखं पदक्षेपः अस्तीति। केन्द्रीयमन्त्रिणा शिवराज-सिङ्घ-चौहानेन आन्ध्रप्रदेशस्य मुख्यमन्त्रिणा एन्. चन्द्रबाबु नायडु इत्यनेन सह अद्य आन्ध्रप्रदेशस्य तिरुपति-जनपदस्य मुक्कावारिपल्ले-ग्रामे वीबी-जी राम जी अधिनियमस्य आरम्भः कृतः। सभाम् सम्बोधयन् श्रीचौहानः अवदत् यत् न कोपि निर्धनः श्रमिकः कार्यरहितः भवेत् तथा च प्रत्येकस्मिन् हस्तयोः आजिविका भवेत् इति अस्याः योजनायाः लक्ष्यम् अस्ति। सः योजनायाः प्रवर्तनाय प्रधानमन्त्रिणं नरेन्द्रमोदिनं धन्यवादं कृत्वा उक्तवान् यत् कार्यक्रमस्यान्तर्गतं कार्य दिनानि शततः पञ्चविंशत्यधिकैक-शत-दिनानि यावत् वर्धितानि सन्ति।

# वित्तमन्त्री निर्मला सीतारमण फ्रांस-देशे निवेश-बैंकिंग-सहयोगयोः विषये चर्चाम् अकरोत्



**हिमसंस्कृतवार्ता।** फ्रांस-देशस्य यात्रायां गता वित्तमन्त्री निर्मला सीतारमण गतदिने पेरिसे 'बीएनपी पारिबास' समूहस्य कॉर्पोरेट-संस्थागत-बैंकिंग-विभागस्य उप-मुख्य-कार्यकारी-अधिकारी तथा कार्यकारी-अध्यक्ष यान गेरार्डिन महोदयेन सह अमिलत्। अस्मिन् अवसरे श्री गेरार्डिनः अवदत् यत् विश्वस्य अनेके देशाः भारतं प्रति एकं विश्वसनीयं निवेश-गंतव्यं मन्यन्ते, तत्र निवेशं कर्तुं च इच्छन्ति। सः भारतस्य डिजिटल-सार्वजनिक-अवसंरचनायाः (DPI) दृढतायाः अपि प्रशंसां कृतवान्। सुश्री सीतारमण तं सूचितवती यत् सर्वकारेण 'विकसित भारत २०४७' इत्यस्य दिशि स्वप्रयासानां भागत्वेन बैंकिंग-क्षेत्रे एका समितिः गठिता अस्ति। केन्द्रीयवित्तमन्त्रिणी समित्यै तस्य विचारान् परामर्शान् च अयाचत, तं च अवदत् यत् भारतं डीपीआई (DPI) तथा खाता-एग्रीगेटर-प्रणालीनां (Account Aggregator systems) कार्यान्वयनस्य उपरि विशेषं ध्यानं दत्त्वा स्वस्य बैंकिंग-क्षेत्रं वैश्विकस्तरे स्थापितं करोति। सुश्री सीतारमण 'फ्लाइंग व्हील्स' इत्यस्य अध्यक्षेण सेबेस्टियन बोगोन महोदयेन सहापि अमिलत्। श्री बोगोनः वैश्विकस्तरे प्रचलन्तीनां 'फ्लाइंग व्हील्स' इत्यस्य सन्तत-पीपीपी (PPP) परियोजनानां विषये सूचनां दत्तवान्। सः अवदत् यत् 'फ्लाइंग व्हेल्स' भारतं मुख्यकेन्द्रं कृत्वा स्वस्य निर्माणसम्बद्धं सम्पूर्णं पारिस्थितिकी-तन्त्रं (Ecosystem) स्थापितुं योजनां रचयति। सुश्री सीतारमण भारते पारिस्थितिकी-तन्त्रस्य स्थापने 'फ्लाइंग व्हेल्स' इत्यस्य अभिरुचेः स्वागतं कृतवती। सा श्री बोगनं 'फ्लाइंग व्हेल्स' सदृश्याः कम्पन्याः कृते भारते विद्यमानानाम् अवसराणां विषये ज्ञापितवती, अस्मिन् क्षेत्रे सक्रियेण जीवन्तेन स्टार्टअप-पारिस्थितिकी-तन्त्रेण सह जुष्टुं च प्रोत्साहितवती। सा जीआईएफटी (GIFT) नगरे स्थितायै भारतीय-वित्तीय-सेवा-केन्द्र-प्राधिकरणाय तथा पोत-विमान-पट्टा (Leasing) एवं -अनुरक्षणं प्रतिसंस्कारश्च (MRO) तन्त्राय अपि अकथयत्, यस्य लाभं कम्पनी ग्रहीतुं शक्नोति।

# डी.पी.एस. बोकारो-विद्यालये रुबी-जुबिली-महोत्सवस्य भव्यः शुभारम्भः




**हिमसंस्कृतवार्ता -सौरभः दे बोकारो, जुलाई २ :** दिल्ली-पब्लिक-स्कूल-नामकः डी.पी.एस. बोकारो-विद्यालयः स्वस्य चत्वारिंशत्तमं स्थापनादिवसम् अत्यन्तं भव्यतया समाचरत्। अनेन सह विद्यालयस्य वर्षव्यापिनः रुबी-जुबिली-महोत्सवस्य शुभारम्भः अभवत्।

अस्मिन् समारोहे मुख्यातिथिरूपेण उत्तर-छोटानागपुर-विभागस्य आयुक्तः श्री विजयकुमारगुप्तः (भा.प्र.से.) उपस्थितः आसीत्। सम्माननीय-अतिथिरूपेण संस्थापक-प्रधानाचार्यः डा. एम. एस. त्यागी तथा अन्ये विशिष्ट-अतिथयः अपि समुपस्थिताः आसन्। मङ्गलदीपप्रज्वलनेन कार्यक्रमस्य शुभारम्भः अभवत्।समारोहे २०२६ वर्षस्य एस.एस.ई.-एस.एस.सी.ई.-परीक्षयोः १७० उत्कृष्टविद्यार्थिनः सम्मानिताः। तेषु विज्ञानशाखायाः राष्ट्रीय-प्रथमस्थान-प्राप्तः आदित्य-मिश्रः विशेषतया सम्मानितः। ४७ मेधा-पुरस्कार-विजेतारः तथा ४२ ‘दीपांश’-योजनायाः विद्यार्थिनः अपि सम्मानं प्राप्तवन्तः।विद्यार्थिभिः प्रस्तुतानि ‘अपराजिता’, ‘नृत्यसङ्गम’ तथा ‘Celebrations’ इत्यादीनि सांस्कृतिक-कार्यक्रमाणि दर्शकानां मनांसि मोहयामासुः। समारोहे विद्यालयस्य त्रैमासिक-पत्रिकायाः ‘Zenith’-विशेषाङ्कस्य अपि विमोचनम् अभवत्।मुख्यातिथिः विद्यालयस्य शैक्षणिक-उत्कृष्टतां, सांस्कृतिक-वैभवं तथा क्रीडाक्षेत्रे योगदानं प्रशंसन् विद्यालयस्य उज्ज्वल-भविष्याय शुभकामनाः प्रादात्। संस्थापक-प्रधानाचार्यः डा. एम. एस. त्यागी विद्यालयस्य निरन्तर-विकासस्य प्रशंसाम् अकरोत्।प्रधानाचार्यः डा. ए. एस. गङ्गवारः स्वागतोद्बोधनं दत्त्वा विद्यालयस्य चत्वारिंशद्वर्षीय-उल्लेखनीय-यात्रायाः विवेचनम् अकरोत्। सः अवदत् यत् विद्यालयः विद्यार्थिनां सर्वाङ्गीण-विकासाय, नैतिक-मूल्येषु तथा वैश्विक-दृष्टिकोणे विशेषं महत्त्वं ददाति।अन्ते उपप्रधान-छात्रनेत्री अनुष्का आर्या धन्यवाद-ज्ञापनम् अकरोत्। विद्यालय-गीतेन राष्ट्रगानेन च समारोहः सम्पन्नः।

# नैऋत्य-प्रावृट्कालः सम्पूर्ण दिल्ली-नगरे, गुजरातस्य केषुचित् भागेषु अग्रे प्रवर्धितः

नैऋत्य-प्रावृट्कालः सम्पूर्ण दिल्ली-नगरे, गुजरातस्य केषुचित् भागेषु, उत्तरप्रदेशस्य शेषभागेषु, मध्यप्रदेशस्य अधिकांशभागेषु, हरियाणा-पञ्जाब्-प्रदेशयोः, राजस्थानस्य केषुचित् भागेषु च अग्रे प्रवर्धितः। राष्ट्रिय-राजधान्यां निम्नवृष्ट्या उष्ण-आर्द्र-स्थित्यां न्यूनताऽगता। ऋतुविभागेन दिने राष्ट्रिय-राजधान्याः अनेकेषु भागेषु वृष्ट्या सह मेघगर्जनस्य मेघाच्छादानस्य च पूर्वानुमानं प्रकटितम् अस्ति। पश्चिम-मध्य-भारतस्य च केषुचित् भागेषु प्रचण्डवृष्ट्यै पीतवर्णीया सञ्चेतना प्रदत्ता अस्ति। उत्तरप्रदेशे प्रावृट् आगमनेन राज्यस्य निवासिनः वृष्ट्या प्रचण्डोष्णात् अत्यन्तं सौख्यं प्राप्तवन्तः ।

# भारतीयनौसेनायाः पूर्वतटपोतसमूहस्य (Eastern Fleet) पोताः उदयगिरिः, कवरत्ती, शक्तिश्च ह्यः सिङ्गापुरस्य 'चांगी' नौसेनाकेन्द्रं प्राप्नुवन्

भारतीयनौसेनायाः पूर्वतटपोतसमूहस्य (Eastern Fleet) पोताः उदयगिरिः, कवरत्ती, शक्तिश्च ह्यः सिङ्गापुरस्य 'चांगी' नौसेनाकेन्द्रं प्राप्नुवन् । रक्षामन्त्रालयेन ज्ञापितं यत् एषा यात्रा द्वयोः नौसेनयोः मध्ये दृढानां दीर्घकालिकानां च सम्बन्धानां प्रतीकः अस्ति, तथा च दक्षिण-पूर्व-एशिया-क्षेत्रे भारतीयनौसेनायाः प्रचलन्त्याः परिचालन-परियोजनायाः (Operational Deployment) भागः अस्ति। मन्त्रालयेन उक्तं यत् नौकाश्रये (बन्दरगाह) वाससमये भारतीयनौसेनायाः पोताः 'क्रॉस-डेक' भ्रमणमाध्यमेन परस्परं समुद्रीहितविषयेषु चर्चाद्वारा च 'सिङ्गापुरगणराज्यस्य नौसेनया' सह सम्बद्धाः भविष्यन्ति। रक्षामन्त्रालयेन प्रतिपादितं यत् भारतं सामूहिकसमुद्रीसुरक्षायाः संवर्धनाय, क्षेत्रीयसहयोगस्य प्रोत्साहनाय, समुद्रीसहभागिनां मध्ये सहयोगस्य अग्रे नयनाय च प्रतिबद्धं वर्तते।

# भारतीयनौसेनायाः त्रिकन्द-पोतेन वाणिज्यिकपोते समुद्रीदस्युतायाः प्रयासस्य सफलं प्रत्युत्तरं दत्तम्

भारतीयनौसेनायाः 'त्रिकन्द' इति पोतेन अदन-खातिकायां (Gulf of Aden) 'एम.वी. गोल्डन आर्सेनल' इति वाणिज्यिकपोते (Merchant Vessel) कृते समुद्रीदस्युतायाः (Piracy) प्रयासस्य सफलतापूर्वकं प्रत्युत्तरं दत्तम्। यमनदेशस्य अदन-नगरात् गच्छता अनेन पोतेन जिबूती-देशात् प्रायः ३०० समुद्रीमील (Nautical Miles) पूर्व-उत्तर-पूर्वे समुद्रीदस्यूनाम् आक्रमणस्य सूचना दत्ता आसीत्। तदनन्तरं तस्मिन् क्षेत्रे नियुक्तं 'आई.एन.एस. त्रिकन्द' इति पोतं वाणिज्यिकपोतस्य रक्षणाय तं रोद्धु च कार्यं सोपितम्।

# किन्नौरे मेघविस्फोटः, पादसेतुः प्रवाहितः; लाहौले पाषाणघातेन एचआरटीसी- परिचालकस्य मृत्युः



**हिमसंस्कृतवार्ताः- शिमला।** हिमाचलप्रदेशे ऋतुविज्ञानविभागस्य 'ऑरेंज अलर्ट' इत्यस्य मध्ये गुरुवासरे किन्नौर-जनपदस्य भावाघाटीक्षेत्रे मेघविस्फोटः अभवत्। मेघविस्फोटजन्येन प्लावेन एकः पादसेतुः प्रवाहितः। अपरतः लाहौलस्य मयाड़-घाटी-क्षेत्रे पर्वतात् पाषाणपतनेन राज्य-पथ- परिवहन- निगमस्य (एचआरटीसी) बस-परिचालकस्य मृत्युः संजाता। गुरुवासरे अपि चम्बा, कुल्लू, हमीरपुर, सोलनम् च जनपदानां कतिपयेषु क्षेत्रेषु वृष्टिः अभवत्, यदा तु राजधान्यां शिमलायां बिन्दुपातः (बूंदाबांदी) जातः। ऊना, काङ्गड़ा-सहितेषु अन्यजनपदेषु ऋतुः सामान्यः आसीत्। किन्नौर- जनपदस्य शांगो-पञ्चायतस्य सुरचो-क्षेत्रे प्रातः सहसैव मेघविस्फोटः अभवत्। अनेन शांगो-खड्डे जलप्लावनं जातं तत्र निर्मितः सेतुः च प्रवाहितः। सेतोः प्रवाहात् दुतरंग-कानगारंग-ग्रामयोः सम्पर्कः विच्छिन्नः जातः। प्लावनस्य जलं क्षेत्रेषु प्रविष्टं येन सस्यानां महती हानिः अभवत्।

लियूडांधार-क्षेत्रे अवरुद्धाः २४ भक्ताः सुरक्षिताः निष्कासिताः अन्यतः, लाहौलस्य मयाड़-घाटी-क्षेत्रस्य धोंदल- नाले प्रातःकाले पर्वतात् पतितस्य पाषाणस्य आघातेन एचआरटीसी-बस-परिचालकस्य मण्डी- निवासिनः ज्ञानसिंहस्य मृत्युः अभवत्। इयं बस-वाहिनी करपट-ग्रामात् प्रत्यागच्छन्ती आसीत्। चम्बाजनपदे बुधवासररात्रितः गुरुवासर- मध्याह्नपर्यन्तं वृष्टिः निरन्तरं प्राचलत्। तथापि वृष्ट्या कस्यापि महतः विनाशस्य सूचना नास्ति। भरमौरस्य बड़ग्राम-पञ्चायतस्य लियूडांधार-क्षेत्रे अवरुद्धाः २४ भक्ताः (श्रद्धालु) सुरक्षिताः बहिः निष्कासिताः। एते भक्ताः ३० जून-दिनाङ्कतः तत्रैव अवरुद्धाः आसन्। रक्षकदलेन रज्जु-सहायेन भक्ताः सुरक्षितं उपनदात् पारं कारिताः। कुल्लू-क्षेत्रे निरन्तरं द्वितीये दिनेऽपि वर्षाक्रमः प्रचलति स्म। बहुषु क्षेत्रेषु जनजीवने प्रभाविते सति जनानां कष्टाणि वर्धितानि।

सार्धद्वितलस्य गृहस्य उपरि पतितः विशालः पाषाणः अपरतः, बंजारक्षेत्रस्य चकुरठाग्रामे भूस्खलनकारणात् एकस्य सार्धद्वितलमस्य गृहस्य उपरि विशालः पाषाणः अपतत्, येन गृहस्य महती क्षतिः अभवत्। अत्र जनधनहानिः न संजाता। रोहताङ्ग- क्षेत्रेऽपि वृष्टिः अभवत्। राजधान्यां शिमलायां बिन्दुपातः जातः, यदा तु ऊना-जनपदे प्रातःकाले मन्दाः मेघाः छादिताः आसन्। अपराह्णात् परं प्रखर-उष्मणा जनाः समस्यानां सम्मुखीचक्रुः। गुरुवासरसायङ्कालपर्यन्तं प्रदेशे ४९ मार्गाः, ४२ विद्युत्-परिवर्तकाः (ट्रांसफार्मर) च निष्क्रियाः आसन्। काङ्गड़ा-नगरे प्रातः मेघाः छादिताः, तदनन्तरम् आदिनं ऋतुः स्वच्छः आसीत्, आतपः च प्रखरः आसीत्। स्वच्छवातावरणे सति तापमानेऽपि वृद्धिः जाता, जनाः च उष्मणः अनुभूतवन्तः।

### काङ्गड़ा-मण्ड्योः तीव्रवृष्टेः 'नारङ्गसचेतना'

शुक्रवासरे काङ्गड़ा-मण्डी-जनपदयोः कतिपयेषु क्षेत्रेषु तीव्रवृष्टेः 'नारङ्गसचेतना' (तीव्रसतर्कता) ज्ञापिता अस्ति। शिमला, कुल्लू, ऊना, सिरमौरः च जनपदानां कृते पीतसतर्कता उद्घोषिता। प्रदेशस्य अन्येषु जनपदेषु अपि वृष्टेः सम्भावना वर्तते, किन्तु कापि सचेतना न दत्ता। जुलाई मासस्य चतुर्थे दिनाङ्के कुल्लू, मण्डी, शिमला, सिरमौरः च जनपदानां कृते पीतसतर्कता घोषिता अस्ति। जुलाई मासस्य पञ्चम-षष्ठ-दिनाङ्कयोः अपि कतिपयेषां जनपदानां कृते वृष्टेः पीतसतर्कता' प्रसारिता अस्ति।

# सी.बी.एस.ई.-विद्यालयेषु शिक्षकाणां नियुक्तौ सर्वकारेण स्थितिः स्पष्टीकृता, एषः क्रमः अङ्गीकरिष्यते



**हिमसंस्कृतवार्ताः - शिमला।** प्रदेशस्य सी.बी.एस.ई.-प्रारूपयुक्तेषु सर्वकारीयविद्यालयेषु शिक्षकाणां नियुक्तिं परितः प्रचलन्तीनां सर्वेषां तर्काणाम् उपरि शिक्षामन्त्रिणा रोहितठाकुरेण विरामः स्थापितः। तेन स्पष्टशब्दैः उक्तं यत् सर्वकारस्य पक्षः पूर्णतया स्पष्टः अस्ति तथा च सी.बी.एस.ई.-विद्यालयेषु नियुक्तिः केवलं योग्यता-सूच्याः (मैरिट) आधारेणैव भविष्यति। मुख्यमन्त्रिणः अनुमत्याः प्राप्स्यमाने एव नियुक्तिप्रक्रिया आरप्स्यते।गुरुवासरे राज्यसचिवालये पत्रकारैः सह सम्भाषणकाले शिक्षामन्त्रिणा प्रोक्तं यत् सी.बी.एस.ई.-विद्यालयानां कृते सङ्घटितायाः चतुःसदस्यात्मकायाः मन्त्रिमण्डल-उपसमित्याः (कैबिनेट सब-कमेटी) उपवेशने गृहीताः निर्णयाः अधुना मुख्यमन्त्रिणः सम्मुखं उपस्थापयिष्यन्ते। यदि आवश्यकता भविष्यति तर्हि एते प्रस्तावाः मन्त्रिमण्डले (कैबिनेट) अपि आनेष्यन्ते। तेन कथितं यत् सर्वकारपक्षतः कृताम् एतां सम्पूर्णां प्रक्रियां उच्चन्यायालयः अपि योग्याम् अमन्यत।

रोहितठाकुरेण ज्ञापितं यत् १५० प्रधानाचार्याणां (प्रिंसिपलों) नियुक्तये सूची सज्जीकृता अस्ति तथा च प्रायः ९५ प्रतिशतं प्राचार्याः स्वमनोऽनुकूलान् विद्यालयान् अपि निश्चितवन्तः। मुख्यमन्त्रिणः स्वीकृतेः अनन्तरं सर्वप्रथमं प्राचार्याणां तदनन्तरं योग्यता-सूच्याः आधारेण शिक्षकाणां नियुक्तयः आरप्स्यन्ते। तेन उक्तं यत् सी.बी.एस.ई.-विद्यालयेषु नवीनानां नियुक्तिनां पश्चात् वर्तमानानां शिक्षकाणां स्थानान्तरणं (तबादलों) प्रति कापि समस्या न भविष्यति।

### विद्यालय-विलयन-नीत्याः (मर्जर) सकारात्मकाः परिणामाः

शिक्षाविभागे प्रागेव बृहत्संख्यायां पदानि रिक्तानि सन्ति, यत्र एते शिक्षकाः समायोजयिष्यन्ते। शिक्षामन्त्रिणा पक्षः कृतः यत् सर्वकारस्य विद्यालय-विलयन-नीत्याः सकारात्मकाः परिणामाः सम्मुखीभूताः। तेन कथितं यत् सम्पूर्णप्रदेशे प्रायः १६ सहस्रं (१६,०००) छात्राणां नवीनं नामाङ्कनं जातम्, येन स्पष्टं भवति यत् जनाः सर्वकारीय-सी.बी.एस.ई.-विद्यालयेषु विश्वासं प्रकटयन्ति। तेन ज्ञापितं यत् अस्मिन् वर्षे पञ्चभ्यः न्यूनछात्रसंख्यायुक्ताः ३० तः ३५ विद्यालयाः पिहिताः (बंद किए गए), यदा तु निर्धारितदूरीं तथा अत्यल्प-छात्रसंख्यां वीक्ष्य ६० तः ७० विद्यालयानां विलयनं कृतम्। प्रायः ३५ तादृशाः विद्यालयाः आसन्, यत्र एकोऽपि छात्रः नामाङ्कितः नासीत्, ते अपि पिहिताः।

### विद्यालयेषु 'अतिथिभोजः' एका उत्तमा प्रचेष्टा

शिक्षामन्त्रिणा रोहितठाकुरेण ज्ञापितं यत् सर्वकारीयविद्यालयेषु अधुना 'अतिथिभोजस्य' नवीना प्रचेष्टा (पहल) अपि आरभ्यते। अस्य अन्तर्गतं कश्चिद्पि जनः विवाहे, जन्मोत्सवे, सेवानिवृत्तौ अथवा अन्येषु शुभप्रसङ्गेषु विद्यालये छात्रेभ्यः पौष्टिकभोजनस्य प्रायोजनं (स्पॉन्सर) कर्तुं शक्ष्यति।

### गुणात्मकशिक्षायै प्रवर्तिष्यते 'जम्मू-प्रतिदर्शः'

जम्मू-कश्मीरस्य सद्यस्तनस्य अध्ययनयात्रायाः उल्लेखं कुर्वन् शिक्षामन्त्री अवदत् यत् तत्रत्यस्य शिक्षाप्रारूपस्य गहनम् अध्ययनं विहितम्। दूरस्थक्षेत्रेषु एकवर्षाय शिक्षकाणां नियुक्तिः तथा च मण्डलस्तरे (जिला स्तर) अन्तर्जालमाध्यमेन (ऑनलाइन) विद्यालय-निरीक्षणसदृश्यः व्यवस्थाः प्रभावशालिन्यः सन्ति। एतेषां प्रारूपाणाम् उपयोगात्मिकाः व्यवस्थाः शीघ्रमेव हिमाचलेऽपि प्रवर्तिताः कर्तुं दिशायां कार्यं विधास्यते।



हिमसंस्कृतवार्ताः, ईदरधीरजः,हैदराबादः

# वार्तासंवादः

नन्दिनी- नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं व्याहरामि। नमस्ते काव्ये।

नन्दिनी- न्यूयार्कनगरे 'साम्राज्य-राज्य-सौधस्य' सहस्र- पादोन्नत-प्रसारक-दण्डस्य उपरि युवक-युवत्यौ आरूढवन्तौ। ताभ्याम् तत्र विवाह-प्रस्तावः कृतः, आरक्षकैः च तौ बद्धौ।

काव्या- नमस्ते नन्दिनि। सत्यं, तादृशे उन्नते स्थाने कृतः प्रस्तावः अति-साहसिकः अभूत्। परन्तु आरक्षकैः तौ समीचीनतया दण्डितौ।

काव्या- अधुना अन्या वार्ता। चीनदेशे स्वचालित-विद्युद्-वाहनस्य चालनसमये चालकाः वञ्चनां कृतवन्तः सन्ति। सुरक्षाचित्रकस्य दृष्टिभ्रमाय तैः क्रीडनक- शिरः स्थापितम्। ततः चालकाः निद्रितवन्तः सन्ति।

नन्दिनी- अहो! सुप्तस्य चालकस्य वाहनं तु महा-विपत्तये भवति। एतादृशं क्रीडनकेन सह क्रीडनं न उचितम्।


नन्दिनी- हस्तिन-नगरे राजनैतिक-अधिवेशने अपि कोलाहलः जातः। तत्र प्रचार-कार्यार्थम् एकः गजः आनीतः। तेन गजेन सभागृहे एव प्रचुरं मूत्रविसर्जनं कृतम्। तद् दृष्ट्वा सभ्याः भीताः सन्तः इतस्ततः धावितवन्तः सन्ति।

काव्या- हास्यकरम्! राजनेतारः गजेन सम्यक् सिक्ताः!

काव्या- क्रीडा-जगतः वार्ता अपि अतीव विचित्रा अस्ति। वर्षद्वयात् पूर्वं नष्टा 'साम्राज्य-क्रीडा-संस्था' पुनर्जीवनं प्राप्तवती अस्ति। तया संस्थया अन्या नष्टा 'त्रि-विम-क्रीडा-संस्था' क्रीता इति घोषणा कृता। कथं नष्टा संस्था अन्यां नष्टां संस्थां क्रीणाति?

नन्दिनी - सत्यम्, प्रेतानां क्रीडा तु केवलं कल्पिता एव भवेत्। अद्यतन्यः वार्ताः समाप्ताः। श्वः पुनर्मेलिष्यामः। नमो नमः।

# विकसितभारत-जी राम जी योजनायाम् जलवाहिका-जलस्रोतसाम् अपि भविष्यति संरक्षणम्, हिमाचलस्य राजपत्रे प्रकाशिता योजना




**हिमसंस्कृतवार्ताः - शिमला।**
हिमाचलप्रदेशे १ जुलाई-दिनाङ्कतः प्रवृत्तायाम् 'विकसित भारत-जी राम जी' योजनायां पर्वतीयराज्यानाम् आवश्यकतानुसारं पारम्परिक-जलवाहिका (कुहल) तथा प्राकृतिक-जलस्रोतसां संरक्षणाय सर्वोच्चप्राथमिकता प्राप्स्यते। योजनायाः प्रथमवर्गस्य (कैटेगरी-१) अन्तर्गतं हिमाचलस्य पारम्परिकी सेचनव्यवस्था पुनरुज्जीविता करिष्यते। अस्मिन् जलवाहिका-जलस्रोतसाम् तथा अन्येषामपि जलसंरक्षणसंरचनानां पुनर्निर्माण-संरक्षण-परिष्कारेषु विशेषं बलं दास्यते। सर्वकारस्य मतमस्ति यत् अनेन जलसंरक्षणाय प्रोत्साहनं मिलिष्यति। साकमेव, कृषि-ग्रामीण-आजीविकयोः अपि दृढता आगमिष्यति।

### १२५ दिनानां रोजगारस्य वैधानिकी प्रत्याभूतिः (गारंटी) मिलिष्यति

नवीनयोजनायाः अन्तर्गतं ग्रामीणपरिवारेभ्यः अधुना वर्षे १२५ दिनानां रोजगारस्य वैधानिकी प्रत्याभूतिः मिलिष्यति। इदं मनरेगा-योजनान्तर्गतं प्राप्यमाणात् रोजगारात् अधिकमस्ति। आवश्यकतां वित्तीयक्षमतां च वीक्ष्य इदं अग्रे अपि वर्धयितुं शक्यते। यदि कश्चित् परिवारः रोजगारस्य याचनायाः १५ दिनानां मध्ये कार्यं न प्राप्नोति, तर्हि सः अनुद्योगवृत्तिं प्राप्स्यति। प्रथम-३० दिनानि यावत् इदं निर्धारितमजूष्याः (मजदूरी) २५ प्रतिशतं भविष्यति। तदनन्तरं ५० प्रतिशतं अनुद्योगवृत्तिं प्राप्स्यते। मस्टररोल-समाप्तेः १५ दिनानां मध्ये मजूष्याः शोधनं (भुगतान) न भवेत् चेत् क्षतिपूर्तिः मिलिष्यति।

### विलम्बस्य क्षतिपूर्तिः साक्षात् लाभार्थिनः वित्तकोषसंख्यायां निक्षिप्ता भविष्यति

१६ तमात् दिनात् प्रतिशं ०.०५ प्रतिशतं प्रतिदिनमिति दरेण विलम्बस्य क्षतिपूर्तिः साक्षात् लाभार्थिनः वित्तकोषसंख्यायां धनप्रेषणरूपेण निक्षिप्ता भविष्यति। योजनायां महिलानां सक्षमीकरणे विशेषं ध्यानं दत्तम् अस्ति। कुललाभार्थिषु न्यूनातिन्यूनं ३३ प्रतिशतं महिलानां सम्मिलनम् अनिवार्यं वर्तते। ताः पुरुषैः समानां मजूष्यां प्राप्स्यन्ति। कार्यस्थले पञ्च वा ततोऽधिकानां शिशूनां उपस्थितौ शिशुगृहस्य व्यवस्था भविष्यति। शिशूनां परिचर्यायै नियुक्तायै महिलाकर्मचारिण्यै पूर्णमजूष्या प्रदास्यते। एकलमहिलाभ्यः, दिव्याङ्गेभ्यः, ६० वर्षाधिकवयस्केभ्यः वृद्धेभ्यः तथा च उभयलिङ्गि-समुदायाय (ट्रांसजेंडर) तेषां क्षमतानुसारं कार्यं प्राप्स्यते।

### डिज़िटल-उपस्थितिः अनिवार्या कृता

पारदर्शितां सुनिश्चितं कर्तुं डिज़िटल-उपस्थितिः अनिवार्या विहिता। अस्मिन् ई-मस्टर, एनएमएमएस-अनुप्रयोगः (एप) तथा बायोमीट्रिक अथवा मुख-प्रत्यभिज्ञानम् (फेस-ऑथेंटिकेशन) इत्येतेषाम् उपयोगः भविष्यति। योजनायां संविदाकाराणां (ठेकेदारों) सहभागिता पूर्णतः प्रतिबन्धिता अस्ति।सामाजिकलेखापरीक्षा ( सोशल-ऑडिट) अथवा तकनीकी-निरीक्षणे वित्तीय-अनियमिततायाः प्राप्तौ सत्यां विधिवत कार्यविधिः भविष्यति। सम्बद्ध-अधिकारिणां विरुद्धं साक्षात् प्रथमसूचनापत्रं (एफआइआर) लेखयितुं उपायुक्ताय (डीसी) निर्देशाः दत्ताः सन्ति।

### ५ किमी तः बहिः कार्ये १० प्रतिशतं अतिरिक्ता मजूष्या, वर्षे ६० दिनानि 'मुख्यकालम्' भविष्यति

विकसितभारत-जी राम जी योजनायाः अन्तर्गतं ५ किलोमीटर परिधेः बहिः कार्यप्राप्तौ १० प्रतिशतं अतिरिक्तायाः मजूष्याः प्रावधानं कृतम् अस्ति। कठिनान् पर्वतीयमार्गान् विलोक्य नियमोऽयमस्ति यत् कार्यं ५ किलोमीटर परिधौ एव मिलितव्यम्। यदि मण्डल-स्तरात् (ब्लॉक स्तर) बहिः कार्यं दीयते, तर्हि यात्रा-अतिरिक्तव्ययार्थं १० प्रतिशतं अतिरिक्तं मानदेयं प्राप्स्यते। न केवलमेतावत्, अपितु मुख्यकृषि-ऋतौ (पीक एग्रीकल्चर सीजन) कार्यस्थगनस्य प्रावधानमपि वर्तते। वपन-लवनयोः (बुआई और कटाई) ऋतौ कृषिकार्यार्थं श्रमिकाणां न्यूनता न भवेत्, अतः सर्वकारः वर्षे ६० दिनानां तादृशं मुख्यकालम् (पीक सीजन) असूचयिष्यति यस्मिन् अस्याः योजनायाः अन्तर्गतं किमपि नवीनं कार्यं न विधास्यते।

## एस.जे.वी.एन.एल. संस्थातः तिसृणां जलविद्युत्परियोजनानां प्रत्याहरणप्रक्रिया शीघ्रमेव आरप्स्यते, मुख्यमन्त्रिणः निर्देशाः




**हिमसंस्कृतवार्ताः - शिमला।** प्रदेशसर्वकारेण राज्यस्य जलविद्युत्सम्पद्भ्यः अधिकतमं आर्थिकलाभं सुनिश्चितं कर्तुं दिशि महत् पदं वर्धयता एस.जे.वी.एन.एल. (SJVNL) संस्थायै पूर्वम् आवण्टितानां तिसृणां प्रमुखाणां जलविद्युत्परियोजनानां प्रत्याहरणस्य (वापस लेने की) प्रक्रियां प्रारब्धुं निर्णयः गृहीतः। मुख्यमन्त्रिणा सुखविन्द्रसिंहसुक्खुना गुरुवासरे सचिवालये ऊर्जाविभागस्य उच्चस्तरीयायां समीक्षोपवेशने अधिकारिणः अस्मिन् विषये आवश्यकीं विधिकार्यविधिम् आरब्धुं निर्दिष्टाः। मुख्यमन्त्रिणा अधिकारिणः ३८२ मेगावाट-क्षमतायुक्तं सुन्नी-परियोजनां, २१० मेगावाट-क्षमतायुक्तां लुहरी-प्रथमचरण-परियोजनां तथा ६६ मेगावाट-क्षमतायुक्तां धौलासिद्ध-जलविद्युत्परियोजनां च सद्यः एव प्रत्याहर्तुं प्रक्रियां प्रारब्धुं कथितम्। एतासां तिसृणां परियोजनानां संकलिता क्षमता ६५८ मेगावाट परिमिता वर्तते।

### जलविद्युत् हिमाचलप्रदेशस्य अर्थव्यवस्थायाः मेरुदण्डः

उपवेशने मुख्यमन्त्रिणा प्रोक्तं यत् जलविद्युत् हिमाचलप्रदेशस्य अर्थव्यवस्थायाः मेरुदण्डः (रीढ़) अस्ति, राज्यसर्वकारस्य उद्देश्यं च प्रदेशस्य प्राकृतिकसम्पद्भ्यः अत्रत्येभ्यः जनेभ्यः अधिकतमं लाभं प्रापयितुमस्ति। तेन कथितं यत् सर्वकारः प्रदेशस्य हितानां रक्षणाय कटिबद्धः अस्ति, प्राकृतिकसम्पत्सु हिमाचलस्य उचितभागं सुनिश्चितं कर्तुं सर्वविधाः प्रचेष्टाः क्रियन्ते। मुख्यमन्त्रिणा अधिकारिणः एन.एच.पी.सी. (NHPC) द्वारा विकस्यमानायाः ५०० मेगावाट-क्षमतायुक्तायाः डुग्गर-जलविद्युत्परियोजनायाः नियमेषु प्रतिबन्धेषु च पुनर्विचारं कर्तुम् अपि निर्देशाः दत्ताः। तेन उक्तं यत् एन.एच.पी.सी. संस्थया परियोजनायां बन्धस्य (बांध की) औन्नत्यं वर्धयितुं प्रस्तावः उपस्थापितः, येन कारणेन परियोजनायाः स्वरूपे प्रभावे च परिवर्तनं भविष्यति। एतादृश्यां स्थितौ राज्यसर्वकारः संशोधितपरियोजनानुसारं हिमाचलस्य कृते श्रेष्ठतरं आर्थिकं तथा अन्यलाभं सुनिश्चितं कर्तुं प्रयतते।

### किशाऊ-बन्धपरियोजनातः प्रतिवर्षं ६०० कोटिरूप्यकाणाम् अयाचितः लाभः

मुख्यमन्त्रिणा ४२२ मेगावाट-क्षमतायुक्तायाः किशाऊ-बन्धपरियोजनायाः सम्बद्धस्य दीर्घकालात् प्रलम्बितस्य विवादस्य समाधानस्यापि उल्लेखः विहितः। तेन ज्ञापितं यत् राज्यसर्वकारेण विगत-अष्टवर्षेभ्यः चलन् गत्यवरोधः समाप्तः कृतः। नवीनव्यवस्थायाः अन्तर्गतं हिमाचलप्रदेशेन अस्यां परियोजनायां किमपि पूँजीनिवेशं न करणीयम्, यदा तु राज्यं २११ मेगावाट परिमितां निःशुल्कां (मुफ्त) विद्युतं प्राप्स्यति। सर्वकारस्य अनुमानमस्ति यत् किशाऊ-परियोजनातः प्राप्स्यमानायाः निःशुल्कविद्युतः माध्यमेन प्रदेशाय प्रतिवर्षं प्रायः ६०० कोटि (६०० करोड़) रूप्यकाणाम् अतिरिक्ता आयः भविष्यति।
अस्मिन् उपवेशने मुख्यमन्त्रिणः प्रधानपरामर्शदाता रामसुभगसिंहः, वित्तविभागस्य प्रधानसचिवः देवेशकुमारः, ऊर्जासचिवः राकेशकंवरः, ऊर्जासंस्थानस्य निदेशकः राकेशप्रजापतिः, एच.पी.पी.सी.एल. (HPPCL) संस्थायाः प्रबन्धनिदेशकः आबिदहुसैनसादिकः इत्यादयः अन्ये च वरिष्ठाः अधिकारिणः उपस्थिताः आसन्।

# संस्कृतभारत्याः सौराष्ट्रप्रान्तस्य प्रान्त- अभ्यासवर्गः बीलखा ग्रामे समायोजितः





**हिमसंस्कृतवार्ताः- जगदीश डाभी (गुजरातम्)** संस्कृतभारत्याः सौराष्ट्रप्रान्तस्य प्रान्त- अभ्यासवर्गः 27/28 -06-2026 इति दिनाङ्कयोः शनिरविवासरयोः जूनागढजनपदस्य बीलखा इति ग्रामस्य भक्त चेलैया धाम्नि सुसम्पन्नः अभवत् । एषः अभ्यासवर्गः कार्यकर्तॄणां विकासाय आयोजितः आसीत्। वर्गस्यास्य प्रारम्भः भारतमातुः पूजनेन मन्त्रोच्चारणेन अभवत्। उद्घाटनसत्रे विशेषरूपेण श्रीचेलैया धाम्नः पीठाधिपतिः प. पू. श्रीरामबापु, भक्त कवि नरसिंह महेता विश्वविद्यालयः जूनागढस्य कुलपतिः प्रतापसिंहः चौहाणमहोदयः, आनन्द-आश्रमस्य प्रधानाचार्यः श्रीनिलेशभट्टमहोदयः, अन्ये प्राध्यापकाः, प्रान्तस्तरस्य अपेक्षिताः निमन्त्रिताश्च सर्वेऽपि कार्यकर्तारः उपस्थिताः आसन् । अस्मिन् वर्गे विविधानि सत्राणि समायोजितानि आसन्। तत्र सत्रस्वीकर्तारूपेण संस्कृतभारत्याः अखिल- भारतीय- सङ्घटनमन्त्री जयप्रकाशः गौतममहोदयः, पश्चिमक्षेत्रस्य सङ्घटनमन्त्री विठ्ठलभट्टमहोदयः, सौराष्ट्रप्रान्तस्य अध्यक्षः सुकान्तकुमारः सेनापतिमहोदयः, उपाध्यक्षा धनेश्रीबेन भट्टमहोदया, मन्त्री पङ्कजभाई त्रिवेदी, सहमन्त्री प्रणवः राज्यगुरुमहोदयः च आसन्। तैः सर्वैः कार्यकर्ता, कार्यपद्धतिः, कार्यकर्तृषु भाषास्तरवर्धनम्, आत्मनिरीक्षणं, तकनिकी- सज्जता, उत्तरदायित्वविषये तथा सौराष्ट्रप्रान्तस्य विविधविषयेषु मार्गदर्शनं प्रदत्तम्। विशेषतया वर्गेऽस्मिन् प्रान्तस्यास्य द्वितीयसम्मेलनस्य स्मरणिकायाः विमोचनम् अपि महानुभावानां उपस्थितौ सञ्जातम्। स्मरणिकायाः अस्याः सम्पादनं जानकीशरणः आचार्यः, किशोरभाई शेलडियामहोदयश्च अकुरुताम्। वर्गस्यास्य सकलम् आयोजनं जूनागढविभागस्य संजोजकः मौलिकभाई केलैयामहोदयः, प्रान्तप्रचारप्रमुखः किशोरभाई शेलडियामहोदयः तथा अन्ये प्रबन्धकाः च अकुर्वन्। एतदनु सौराष्ट्रप्रान्तस्य प्रतिविभागम् अभ्यासवर्गाः भविष्यन्ति तत्र विभागस्य प्रत्येकं जनपदस्य दायित्ववन्तः कार्यकर्तारः प्रशिक्षणं प्राप्स्यन्ति।




# संयमस्य विजयः (संयम की जीत)

शीतकालस्य एका जनसम्मर्दाकुला (भीड़भरी) प्रातःकालवेला आसीत्। कोलकातागामिनी रेलयानं मञ्चे (प्लेटफॉर्म पर) समागतम् आसीत्। यदा आर्या स्वकीयाम् आरक्षितां शय्याम् (सीट) प्रति अगच्छत्, तदा सा अपश्यत् यत् कश्चन प्रौढः (अधेड़ उम्र के) सज्जनः तस्याः आसने उपविश्य समाचारपत्रं पठति स्म। आर्या अतीव विनम्रेण स्वरेण अवदत्, "महोदय! क्षम्यताम्, किं अहम् भवतः पत्रकम् (टिकट) द्रष्टुं शक्नोमि? मन्ये एतद् आसनं मम अस्ति।"सः सज्जनः कुपितः अभवत्। पत्रकं कम्पयन् (लहराते हुए) सः अवदत्, "किं मतिभ्रष्टा असि? पश्य एतत् पत्रकम्। मम आसनम् एतत्। विना कारणं मम मस्तिष्काटनं (दिमाग खाना) मा कुरु।"

सर्वोपि रेलप्रकोष्ठः (पूरा डिब्बा) तं प्रति अपश्यत्। यदि अन्यः कोऽपि अभविष्यत्, तर्हि सः तत्रैव वादविवादम् अकरिष्यत्, सर्वेषां सम्मुखं तं मनुष्यम् असत्यं च प्रामाणयिष्यत्। परन्तु आर्या तूष्णीम् (चुप) अतिष्ठत्। सा शान्त्या तस्य पत्रकम् अपश्यत्, मन्दं हसितवती च, ततः एकमपि शब्दं विना उक्त्वा पार्श्वे स्थिता अभवत्।

सः मनुष्यः अचिन्तयत् यत् बालिका भीता अभवत्। सः सगर्वम् उपविष्टवान्। रेलयानं चलितम्। दश निमेषोत्तरं (१० मिनट बाद) आर्या पुनः तस्य समीपम् अगच्छत्। सा अतीव मन्दस्वरेण अवदत्, "महोदय, किम् एकं वचनं वदानि?"

"वद," सः भर्त्सयन् (गुर्राते हुए) अवदत्।

"महोदय! भवान् आसने सर्वथा सम्यक् उपविष्टः अस्ति। केवलम् एका लघ्वी त्रुटिः अभवत्। भवतः पत्रकं तु मुम्बईगामिन्याः रेलयान्याः अस्ति, परन्तु एतत् रेलयानं कोलकातां प्रति गच्छति। भवान् भ्रमवशात् अन्यद् रेलयानम् आरूढवान्।"

एतत् श्रुत्वा तस्य मनुष्यस्य मुखं वर्णहीनं (सफेद) जातम्। सः कम्पमानेन हस्तेन पत्रकम् अपश्यत्, गवाक्षात् (खिड़की से) बहिः च अवलोकितवान्। त्रुटिं ज्ञात्वा एव तस्य स्वेदविन्दवः (पसीना) निर्गताः। यः मनुष्यः अधुना एव सिंह इव गर्जति स्म, सः इदानीं लज्जया भूमौ निमज्जति स्म (जमीन में गड़ा जा रहा था)। सः करद्वयं योजयित्वा (हाथ जोड़कर) अवदत्, "पुत्रि! मां क्षमस्व। अहम् उपरि तव अक्रुध्यम्। यदि त्वम् ऐच्छिष्यः, तर्हि सर्वेषां समक्षं मम अपमानं कर्तुम् अशक्नोः।"

आर्या अवदत्, "न हि महोदय, क्रोधेन किमपि न प्राप्यते। यदा अहम् अपि उच्चैः अवदिष्यम्, तदा भवान् अधिकं क्रुद्धः अभविष्यत्। कदाचित् मम वचनं न च अङ्गीकरिष्यत्। कदाचित् तूष्णीं भूत्वा उचितसमयस्य प्रतीक्षा करणम् एव महती विजयः भवति। क्रोधे वयं केवलं युद्धं जयामः, परन्तु संयमेन वयं मनुष्यं जयामः।" अग्रिमे रेलस्थानके (स्टेशन पर) सः सज्जनः अवतीर्णः (उतर गए)। परन्तु गच्छन् सः सम्पूर्णाय रेलप्रकोष्ठाय एकां शिक्षां दत्त्वा गतः।

**शिक्षाः** "उच्चैः वक्ता सदैव सत्यो न भवति, मौनं धारयन् च सदैव असत्यो न भवति। क्रोधः भवद्भ्यः निमेषद्वयस्य सन्तोषं ददाति, परन्तु संयमः भवद्भ्यः जीवनपर्यन्तं सम्मानं यच्छति। वास्तविकः शक्तिमान् सः एव अस्ति यः परिस्थितिम् न, अपितु आत्मानं नियन्त्रयितुं जानाति।"

## लौकिकन्यायकोशः

### काकदध्युपघातन्यायः

कश्चन मनुष्यः केनापि कार्येण बहिः गच्छति स्म अन्यः गृहस्य अन्तरेव वर्तते स्म। "गृहे वर्तमानं" दधि काकेभ्यः रक्ष्यताम्" इति तेन बहिः गच्छता अन्यः कथितः। किञ्चित्कालानन्तरं कश्चन शुनकः आगत्य सर्वमपि दधि खादितवान्। काकेभ्यः एव दधि रक्षणीयम् इति चिन्तयता तेन मन्दमतिना दधिरक्षणस्य महत्त्वं न ज्ञातम् एवम् उपलक्षणम् अविज्ञाय ये वाच्यार्थमेव आश्रयन्ति तेषां विषये अस्य प्रयोगः क्रियते।

**डा. वर्षा प्रकाश टोणगांवकर**
**पुणे/ महाराष्ट्रम्**

## संस्कृतज्ञान प्रश्नोत्तरी

**1. प्रश्नः** भारतस्य राजधानी का अस्ति?
**उत्तरः** भारतस्य राजधानी नई दिल्ली (देहली) अस्ति।
**2. प्रश्नः** देहली कस्याः नद्याः तटे स्थिता अस्ति?
**उत्तरः** देहली यमुना नद्याः तटे स्थिता अस्ति।
**3. प्रश्नः** देहल्याः प्राचीनं नाम किम् आसीत्?
**उत्तरः** महाभारतकाले देहल्याः प्राचीनं नाम 'इन्द्रप्रस्थम्' आसीत्।
**4. प्रश्नः** देहल्यां कतिपय प्रसिद्धानि ऐतिहासिकानि स्थलानि कानि सन्ति?
**उत्तरः** देहल्यां रक्तदुर्गम्, कुतुबमीनारः, इण्डिया गेट, राजघाट च प्रसिद्धानि स्थलानि सन्ति।
**5. प्रश्नः** भारतस्य राष्ट्रपतिभवनं कुत्र अस्ति?
**उत्तरः** भारतस्य राष्ट्रपतिभवनं देहल्यां स्थितम् अस्ति।
**6. प्रश्नः** देहल्यां स्थितं शिखानां प्रसिद्धं धार्मिकस्थलं किम्?
**उत्तरः** देहल्यां स्थितं शिखानां प्रसिद्धं धार्मिकस्थलं 'गुरुद्वारा बंगला साहिब' अस्ति।
**7. प्रश्नः** भारतस्य संसद भवनं कुत्र अस्ति?
**उत्तरः** भारतस्य नूतनं पुरातनं च संसद भवनं देहल्याम् एव अस्ति।
**8. प्रश्नः** देहल्यां निर्मितं आधुनिकं विशालं हिन्दू मन्दिरं किम् अस्ति?
**उत्तरः** देहल्यां निर्मितं आधुनिकं विशालं हिन्दू मन्दिरं 'स्वामिनारायण अक्षरधाम मन्दिरम्' अस्ति।
**9. प्रश्नः** देहल्याः मुख्यं द्रुतगामी लोकयानं किम् अस्ति?
**उत्तरः** देहल्याः मुख्यं द्रुतगामी लोकयानं 'मेट्रो रेलयानम्' अस्ति।
**10. प्रश्नः** राष्ट्रपिता महात्मा गान्धी महोदयस्य समाधिस्थलं किम् उच्यते, तत् कुत्र अस्ति च?
**उत्तरः** महात्मा गान्धी महोदयस्य समाधिस्थलं 'राजघाट' इति उच्यते, तत् देहल्यां स्थितम् अस्ति।